# Vedamantramanjari 1

# વેદમન્ત્રમઞ્જરિ - ૧

## Document Information

Text title : veda mantra manjari - 1

File name : vedamantramanjari1.itx

Category : sUkta, veda, svara

Location : doc_veda

Transliterated by : Rekha Venkatesh

Proofread by : Rekha Venkatesh

Latest update : February 22, 2018

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 31, 2020

*sanskritdocuments.org*

Vedamantramanjari 1

# વેદમન્ત્રમઞ્જરિ - ૧

હરિઃ ૐ

॥ ૐ શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ ॥

## ॥ મઙ્ગલાચરણમ્ ॥

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્ સર્વવિઘ્નોપશાન્તયે ॥ ૧॥

અગજાનન પદ્માર્કં ગજાનનમહર્નિશમ્ ।
અનેકદં તં ભક્તાનાં એકદન્તમુપાસ્મહે ॥ ૨॥

વાગર્થાવિવ સમ્પૃક્તૌ વાગર્થપ્રતિપત્તયે ।
જગતઃ પિતરૌ વન્દે પાર્વતીપરમેશ્વરૌ ॥ ૩॥

ગુરુર્બ્રહ્મા ગુરુર્વિષ્ણુઃ ગુરુર્દેવો મહેશ્વરઃ ।
ગુરુસ્સાક્ષાત્ પરબ્રહ્મ તસ્મૈ શ્રી ગુરવે નમઃ ॥ ૪॥

આઙ્ગિકં ભુવનં યસ્ય વાચિકં સર્વવાઙ્મયમ્ ।
આહાર્યં ચન્દ્ર તારાદિ તં નુમઃ સાત્વિકં શિવમ્ ॥ ૫॥

સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે ગૌરિ નારાયણિ નમોઽસ્તુતે ॥ ૬॥

સરસ્વતિ નમસ્તુભ્યં વરદે કામરૂપિણિ ।
વિદ્યારમ્ભં કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥ ૭॥

ત્વમેવ માતા ચ પિતા ત્વમેવ ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ ત્વમેવ સર્વં મમ દેવ દેવ ॥ ૮॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા બુધ્યાત્મના વા પ્રકૃતેઃ સ્વભાવાત્ ।
કરોમિ યદ્યત્સકલં પરસ્મૈ નારાયણાયેતિ સમર્પયામિ ॥ ૯॥

ૐ અસતો મા સદ્ગમય । તમસો મા જ્યોતિર્ગમય । મૃત્યોર્મા અમૃતં ગમય ॥ ૧૦॥

ૐ ભૂઃ ૐ ભુવઃ ૐ સુવઃ ૐ મહઃ ૐ જનઃ ૐ તપઃ ૐ સત્યમ્ ।
ૐ તત્સવિતુર્વરેણ્યં ભર્ગોદેવસ્ય ધીમહિ । ધિયો યો નઃ પ્રચોદયાત્ ॥૧૧॥

ૐ ગણાનાં ત્વા ગણપતિગ્ં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શૃણ્વન્નૂતિભિસ્સીદ સાદનમ્ ॥ ૧૨॥

॥ મહાગણપતયે નમઃ ॥

ૐ પ્રણો દેવિ સરસ્વતી વાજેભિર્વાજિનીવતી । ધીનામવિત્ર્યવતુ ॥

વાગ્દેવ્યૈ નમઃ ॥

ૐ નમો બ્રહ્મણે ધારણં મે અસ્ત્વનિરાકરણં ધારયિતા ભૂયાસં
કર્ણયોશ્શ્રુતં મા ચ્યોઢ્વં મમામુષ્ય ઓમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ।

## ॥ ગણપત્યથર્વશીર્ષોપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાગ્ં સસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ । સ્વસ્તિ
નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૐ શાન્તિઃ શાન્તિઃ
શાન્તિઃ ॥

ૐ નમસ્તે ગણપતયે । ત્વમેવ પ્રત્યક્ષં તત્ત્વમસિ । ત્વમેવ કેવલં
કર્તાઽસિ । ત્વમેવ કેવલં ધર્તાઽસિ । ત્વમેવ કેવલં હર્તાઽસિ । ત્વમેવ
સર્વં ખલ્વિદં બ્રહ્માસિ । ત્વં સાક્ષાદાત્માઽસિ નિત્યમ્ ॥ ૧ ॥ ઋતં વચ્મિ ।
સત્યં વચ્મિ ॥ ૨ ॥

અવ ત્વં મામ્ । અવ વક્તારમ્ । અવ શ્રોતારમ્ । અવ

દાતારમ્ । અવ ધાતારમ્ । અવાનૂચાનમવ શિષ્યમ્ । અવ પશ્ચાત્તાત્ ।
અવ પુરસ્તાત્ । અવોત્તરાત્તાત્ । અવ દક્ષિણાત્તાત્ । અવ ચોર્ધ્વાત્તાત્ ।
અવાધરાત્તાત્ । સર્વતો માં પાહિ પાહિ સમન્તાત્ ॥ ૩ ॥ ત્વં વાઙ્મયસ્ત્વં ચિન્મયઃ ।
ત્વમાનન્દમયસ્ત્વં બ્રહ્મમયઃ । ત્વં સચ્ચિદાનન્દાઽદ્વિતીયોઽસિ । ત્વં પ્રત્યક્ષં
બ્રહ્માસિ । ત્વં જ્ઞાનમયો વિજ્ઞાનમયોઽસિ ॥ ૪ ॥

સર્વં જગદિદં ત્વત્તો જાયતે । સર્વં જગદિદં ત્વત્તસ્તિષ્ઠતિ । સર્વં જગદિદં ત્વયિ
લયમેષ્યતિ । સર્વં જગદિદં ત્વયિ પ્રત્યેતિ । ત્વં ભૂમિરાપોઽનલોઽનિલો નભઃ
। ત્વં ચત્વારિ વાક્પદાનિ ॥ ૫ ॥

ત્વં ગુણત્રયાતીતઃ । ત્વં અવસ્થાત્રયાતીતઃ ।
ત્વં દેહત્રયાતીતઃ । ત્વં કાલત્રયાતીતઃ । ત્વં મૂલાધારસ્થિતોઽસિ નિત્યમ્ ।
ત્વં શક્તિત્રયાત્મકઃ । ત્વાં યોગિનો ધ્યાયન્તિ નિત્યમ્ । ત્વં બ્રહ્મા ત્વં વિષ્ણુસ્ત્વં
રુદ્રસ્ત્વમિન્દ્રસ્ત્વમગ્નિસ્ત્વં વાયુસ્ત્વં સૂર્યસ્ત્વં ચન્દ્રમાસ્ત્વં બ્રહ્મ ભૂર્ભુવઃ સ્વરોમ્ ॥

૬ ॥

ગણાદિં પૂર્વમુચ્ચાર્ય વર્ણાદીં સ્તદનન્તરમ્ । અનુસ્વારઃ પરતરઃ ।
અર્ધેન્દુલસિતમ્ । તારેણ ઋદ્ધમ્ । એતત્તવ મનુસ્વરૂપમ્ । ગકારઃ પૂર્વરૂપમ્ ।
અકારો મધ્યમરૂપમ્ । અનુસ્વારશ્ચાન્ત્યરૂપમ્ । બિન્દુરુત્તરરૂપમ્ । નાદઃ સન્ધાનમ્
। સગ્ંહિતા સન્ધિઃ । સૈષા ગણેશવિદ્યા । ગણક ઋષિઃ । નિચૃદ્ગાયત્રીચ્છન્દઃ
। ગણપતિર્દેવતા । ૐ ગં ગણપતયે નમઃ ॥ ૭ ॥

એકદન્તાય વિદ્મહે વક્રતુણ્ડાય ધીમહિ । તન્નો દન્તિઃ પ્રચોદયાત્ ॥ ૮
॥ એકદન્તં ચતુર્હસ્તં પાશમઙ્કુશધારિણમ્ । રદં ચ વરદં
હસ્તૈર્બિભ્રાણં મૂષકધ્વજમ્ । રક્તં લમ્બોદરં શૂર્પકર્ણકં
રક્તવાસસમ્ । રક્તગન્ધાનુલિપ્તાઙ્ગં રક્તપુષ્પૈઃ સુપૂજિતમ્ ।
ભક્તાનુકમ્પિનં દેવં જગત્કારણમચ્યુતમ્ । આવિર્ભૂતં ચ
સૃષ્ટ્યાદૌ પ્રકૃતેઃ પુરુષાત્પરમ્ । એવં ધ્યાયતિ યો નિત્યં સ
યોગી યોગિનાં વરઃ ॥ ૯ ॥ નમો વ્રાતપતયે નમો ગણપતયે નમઃ પ્રમથપતયે નમસ્તેઽસ્તુ
લમ્બોદરાયૈકદન્તાય વિઘ્નનાશિને શિવસુતાય વરદમૂર્તયે નમઃ ॥ ૧૦ ॥

એતદથર્વશીર્ષં યોઽધીતે સ બ્રહ્મભૂયાય કલ્પતે । સ સર્વવિઘ્નૈર્ન બાધ્યતે

। સ સર્વત્ર સુખમેધતે । સ પઞ્ચમહાપાપાત્ પ્રમુચ્યતે । સાયમધીયાનો દિવસકૃતં પાપં નાશયતિ । પ્રાતરધીયાનો રાત્રિકૃતં પાપં નાશયતિ । સાયં પ્રાતઃ પ્રયુઞ્જાનો પાપોઽપાપો ભવતિ । સર્વત્રાધીયાનોઽપવિઘ્નો ભવતિ । ધર્માર્થકામમોક્ષં ચ વિન્દતિ । ઇદમથર્વશીર્ષમશિષ્યાય ન દેયમ્ । યો યદિ મોહાદ્ દાસ્યતિ સ પાપીયાન્ ભવતિ । સહસ્રાવર્તનાદ્યં યં કામમધીતે તં તમનેન સાધયેત્ ॥ ૧૧ ॥

અનેન ગણપતિમભિષિઞ્ચતિ સ વાગ્મી ભવતિ । ચતુર્થ્યામનશ્નન્ જપતિ સ વિદ્યાવાન્ ભવતિ । ઇત્યથર્વણવાક્યમ્ । બ્રહ્માદ્યાવરણં વિદ્યાન્ન બિભેતિ કદાચનેતિ ॥ ૧૨ ॥ યો દૂર્વાઙ્કુરૈર્યજતિ સ વૈશ્રવણોપમો ભવતિ । યો લાજૈર્યજતિ સ યશોવાન્ ભવતિ । સ મેધાવાન્ ભવતિ । યો મોદકસહસ્રેણ યજતિ સ વાઞ્છિતફલમવાપ્નોતિ । યઃ સાજ્ય સમિદ્ભિર્યજતિ સ સર્વં લભતે સ સર્વં લભતે ॥ ૧૩ ॥ અષ્ટૌ બ્રાહ્મણાન્ સમ્યગ્ ગ્રાહયિત્વા સૂર્યવર્ચસ્વી ભવતિ । સૂર્યગ્રહે મહાનદ્યાં પ્રતિમાસન્નિધૌ વા જપ્ત્વા સિદ્ધમન્ત્રો ભવતિ । મહાવિઘ્નાત્ પ્રમુચ્યતે । મહાદોષાત્ પ્રમુચ્યતે । મહાપ્રત્યવાયાત્ પ્રમુચ્યતે । સ સર્વવિદ્ભવતિ સ સર્વવિદ્ભવતિ । ય એવં વેદ । ઇત્યુપનિષત્ ॥ ૧૪ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ પુણ્યાહવાચનમ્ ॥

ૐ બ્રહ્મજજ્ઞાનં પ્રથમં પુરસ્તાદ્વિસીમતસ્સુરુચો વેન આવઃ । સબુધ્નિયા ઉપમા અસ્ય વિષ્ઠાસ્સતશ્ચ યોનિમસતશ્ચ વિવઃ । નાકે સુપર્ણમુપ યત્પતન્તં હૃદા વેનન્તો અભ્ય ચક્ષત ત્વા । હિરણ્યપક્ષં વરુણસ્ય દૂતં યમસ્ય યોનૌ શકુનં ભુરણ્યુમ્ । આપ્યાયસ્વ સમેતુ તે વિશ્વતઃ સોમ વૃષ્ણિયમ્ । ભવા વાજસ્ય સઙ્ગથે । યો રુદ્રો અગ્નૌ યો અપ્સુ ય ઓષધીષુ યો રુદ્રો વિશ્વા ભુવના વિવેશ તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ઇદં વિષ્ણુર્વિચક્રમે ત્રેધા નિદધે પદમ્ । સમૂઢમસ્ય પાગ્ં સુરે । ઇન્દ્રં વિશ્વા અવીવૃધન્ત્સમુદ્રવ્યચસઙ્ગિરો રથીતમગ્ં રથીનાં વાજાનાગ્ં સત્પતિં પતિમ્ । આપો વા ઇદગ્ં સર્વં વિશ્વા ભૂતાન્યાપઃ

પ્રાણા વા આપઃ પશવ આપોઽન્નમાપોઽમૃતમાપસ્સંરાડાપો
વિરાડાપસ્સ્વરાડાપશ્છન્દાગ્ંસ્યાપો જ્યોતીગ્ંષ્યાપો
યજૂગ્ંષ્યાપસ્સત્યમાપસ્સર્વા દેવતા આપો ભૂર્ભુવસ્સુવરાપ ઓમ્ ॥
અપઃ પ્રણયતિ । શ્રદ્ધા વા આપઃ । શ્રદ્ધામેવારભ્ય પ્રણીય પ્રચરતિ ।
યજ્ઞો વા આપઃ । યજ્ઞમેવારભ્ય પ્રણીય પ્રચરતિ । અપઃ પ્રણયતિ । વજ્રો
વા આપઃ । વજ્રમેવ ભ્રાતૃવ્યેભ્યઃ પ્રહૃત્ય પ્રણીય પ્રચરતિ । અપઃ
પ્રણયતિ । આપો વૈ રક્ષોઘ્નીઃ । રક્ષસામપહત્યૈ । અપઃ પ્રણયતિ । આપો
વૈ દેવાનાં પ્રિયં ધામ । દેવાનામેવ પ્રિયં ધામ પ્રણીય પ્રચરતિ
। અપઃ પ્રણયતિ । આપો વૈ સર્વા દેવતાઃ । દેવતા એવારભ્ય પ્રણીય
પ્રચરતિ । અપઃ પ્રણયતિ । આપો વૈ શાન્તાઃ । શાન્તાભિરેવાસ્ય શુચગ્ં
શમયતિ । દેવો વઃ સવિતોત્પુનાત્વચ્છિદ્રેણ પવિત્રેણ વસોસ્સૂર્યસ્ય
રશ્મિભિઃ ॥

કૂર્ચાગ્રૈઃ રાક્ષસાન્ ઘોરાન્ છિન્ધિ કર્મવિઘાતિનઃ ।
ત્વામર્પયામિ કુમ્ભેઽસ્મિન્ સાફલ્યં કુરુ કર્મણિ ॥ ૧ ॥

વૃક્ષરાજ સમુદ્ભૂતાઃ શાખાયાઃ પલ્લવત્વચઃ ।
યુષ્માન્ કુમ્ભેષ્વર્પયામિ સર્વપાપાપનુત્તયે ॥ ૨ ॥

નાલિકેર સમુદ્ભૂત ત્રિનેત્ર હરસત્તમ ।
શિખયા દુરિતં સર્વં પાપં પીડાં ચ મે નુદ ॥ ૩ ॥

સ હિ રત્નાનિ દાશુષે સુવાતિ સવિતા ભગઃ । તં ભાગં ચિત્રમીમહે ॥

## ॥ વરુણાઽવાહનમ્ ॥

ૐ તત્ત્વાયામિ બ્રહ્મણા વન્દમાનસ્તદાશાસ્તે યજમાનો હવિર્ભિઃ । અહેડમાનો
વરુણેહ બોધ્યુરુશગ્ં સ મા ન આયુઃ પ્રમોષીઃ ॥ ૐ ભૂર્ભુવસ્સુવરોમ્ । અસ્મિન્
કુમ્ભે વરુણમાવાહયામિ । વરુણસ્ય ઇદમાસનમ્ । વરુણાય નમઃ । પ્રચેતસે નમઃ । સુરૂપિણે
નમઃ । અપાં પતયે નમઃ । મકરવાહનાય નમઃ । જલાઽધિપતયે નમઃ । પાશહસ્તાય નમઃ ।
સર્વતીર્થાધિપતયે નમઃ । સકલારાધનૈઃ સ્વર્ચિતમ્ ॥ (અથ પુણ્યાહવાચનં કુર્યાત્)

# ॥ પવમાનસૂક્તમ્ ॥

ૐ ॥ હિરણ્યવર્ણાઃ શુચયઃ પાવકા યાસુ જાતઃ કશ્યપો યાસ્વિન્દ્રઃ ।
અગ્નિં યા ગર્ભં દધિરે વિરૂપાસ્તા ન આપશ્શગ્ગ્ સ્યોના ભવન્તુ ॥

યાસાગ્ં રાજા વરુણો યાતિ મધ્યે સત્યાનૃતે અવપશ્યં જનાનામ્ ।
મધુશ્ચુતશ્શુચયો યાઃ પાવકાસ્તા ન આપશ્શગ્ગ્ સ્યોના ભવન્તુ ॥

યાસાં દેવા દિવિ કૃણ્વન્તિ ભક્ષં યા અન્તરિક્ષે બહુધા ભવન્તિ । યાઃ
પૃથિવીં પયસોન્દન્તિ શુક્રાસ્તા ન આપશ્શગ્ગ્ સ્યોના ભવન્તુ ॥ શિવેન
મા ચક્ષુષા પશ્યતાપશ્શિવયા તનુવોપ સ્પૃશત ત્વચં મે । સર્વાગ્ં
અગ્નીગ્ં રપ્સુષદો હુવે વો મયિ વર્ચો બલમોજો નિધત્ત ॥

પવમાનસ્સુવર્જનઃ । પવિત્રેણ વિચર્ષણિઃ । યઃ પોતા સ પુનાતુ મા ।
પુનન્તુ મા દેવજનાઃ । પુનન્તુ મનવો ધિયા । પુનન્તુ વિશ્વ આયવઃ ।
જાતવેદઃ પવિત્રવત્ । પવિત્રેણ પુનાહિ મા । શુક્રેણ દેવદીદ્યત્ । અગ્ને
ક્રત્વા ક્રતૂગ્ં રનુ । યત્તે પવિત્રમર્ચિષિ । અગ્ને વિતતમન્તરા ।
બ્રહ્મ તેન પુનીમહે । ઉભાભ્યાં દેવસવિતઃ । પવિત્રેણ સવેન ચ । ઇદં
બ્રહ્મ પુનીમહે । વૈશ્વદેવી પુનતી દેવ્યાગાત્ । યસ્યૈ બહ્વીસ્તનુવો
વીતપૃષ્ઠાઃ । તયા મદન્તઃ સધમાદ્યેષુ । વયગ્ગ્ સ્યામ પતયો
રયીણામ્ । વૈશ્વાનરો રશ્મિભિર્મા પુનાતુ । વાતઃ પ્રાણેનેષિરો મયો
ભૂઃ । દ્યાવાપૃથિવી પયસા પયોભિઃ । ઋતાવરી યજ્ઞિયે મા પુનીતામ્ ॥

બૃહદ્ભિઃ સવિતસ્તૃભિઃ । વર્ષિષ્ઠૈ-ર્દેવમન્મભિઃ । અગ્ને દક્ષૈઃ
પુનાહિ મા । યેન દેવા અપુનત । યેનાપો દિવ્યંકશઃ । તેન દિવ્યેન બ્રહ્મણા
। ઇદં બ્રહ્મ પુનીમહે । યઃ પાવમાનીરદ્ધ્યેતિ । ઋષિભિસ્સમ્ભૃતગ્ં
રસમ્ । સર્વગ્ં સ પૂતમશ્નાતિ । સ્વદિતં માતરિશ્વના । પાવમાનીર્યો
અધ્યેતિ । ઋષિભિસ્સમ્ભૃતગ્ં રસમ્ । તસ્મૈ સરસ્વતી દુહે ।
ક્ષીરગ્ં સર્પિર્મધૂદકમ્ ॥ પાવમાનીસ્સ્વસ્ત્યયનીઃ । સુદુઘાહિ
પયસ્વતીઃ । ઋષિભિસ્સમ્ભૃતો રસઃ । બ્રાહ્મણેષ્વમૃતગ્ં હિતમ્
। પાવમાનીર્દિશન્તુ નઃ । ઇમં લોકમથો અમુમ્ । કામાન્થ્સમર્ધયન્તુ
નઃ । દેવી-ર્દેવૈઃ સમાભૃતાઃ । પાવમાનીસ્સ્વસ્ત્યયનીઃ । સુદુઘાહિ

ઘૃતશ્ચુતઃ । ઋષિભિઃ સમ્ભૃતો રસઃ । બ્રાહ્મણેષ્વમૃતગ્ં
હિતમ્ । યેન દેવાઃ પવિત્રેણ । આત્માનં પુનતે સદા । તેન સહસ્રધારેણ
। પાવમાન્યઃ પુનન્તુ મા । પ્રાજાપત્યં પવિત્રમ્ । શતોદ્યામગ્ં હિરણ્મયમ્
। તેન બ્રહ્મ વિદો વયમ્ । પૂતં બ્રહ્મ પુનીમહે । ઇન્દ્રસ્સુનીતી સહમા
પુનાતુ । સોમસ્સ્વસ્ત્યા વરુણસ્સમીચ્યા । યમો રાજા પ્રમૃણાભિઃ પુનાતુ મા ।
જાતવેદા મોર્જયન્ત્યા પુનાતુ । ભૂર્ભુવસ્સુવઃ ॥

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે
। દૈવીસ્સ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ ।
શન્નો અસ્તુ દ્વિપદે । શં ચતુષ્પદે ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ લઘુન્યાસઃ ॥

ૐ અથાત્માનગ્ં શિવાત્માનગ્ શ્રીરુદ્રરૂપં ધ્યાયેત્ ॥

શુદ્ધસ્ફટિકસંકાશં ત્રિનેત્રં પઞ્ચવક્ત્રકમ્ । ગઙ્ગાધરં દશભુજં
સર્વાભરણભૂષિતમ્ ॥ નીલગ્રીવં શશાઙ્કાઙ્કં નાગયજ્ઞોપવીતિનમ્ । વ્યાઘ્રચર્મોત્તરીયં
ચ વરેણ્યમભયપ્રદમ્ ॥ કમણ્ડલ્વક્ષસૂત્રાણાં ધારિણં શૂલપાણિનમ્ । જ્વલન્તં
પિઙ્ગલજટા-શિખામુદ્યોતધારિણમ્ ॥ વૃષસ્કન્ધ-સમારૂઢમ્ ઉમાદેહાર્ધ-ધારિણમ્ ।
અમૃતેનાપ્લુતં શાન્તં દિવ્યભોગસમન્વિતમ્ ॥ દિગ્દેવતાસમાયુક્તં સુરાસુરનમસ્કૃતમ્ । નિત્યં
ચ શાશ્વતં શુદ્ધં ધ્રુવમક્ષરમવ્યયમ્ ॥ સર્વવ્યાપિનમીશાનં રુદ્રં વૈ વિશ્વરૂપિણમ્ ।
એવં ધ્યાત્વા દ્વિજસમ્યક્ તતો યજનમારભેત્ ॥

ૐ પ્રજનને બ્રહ્મા તિષ્ઠતુ । પાદયોર્વિષ્ણુસ્તિષ્ઠતુ । હસ્તયોર્હરસ્તિષ્ઠતુ ।
બાહ્વોરિન્દ્રસ્તિષ્ઠતુ । જઠરેઽગ્નિસ્તિષ્ઠતુ । હૃદયે શિવસ્તિષ્ઠતુ । કણ્ઠે
વસવસ્તિષ્ઠન્તુ । વક્ત્રે સરસ્વતી તિષ્ઠતુ । નાસિકયોર્વાયુસ્તિષ્ઠતુ । નયનયોશ્ચન્દ્રાદિત્યૌ
તિષ્ઠેતામ્ । કર્ણયોરશ્વિનૌ તિષ્ઠેતામ્ । લલાટે રુદ્રાસ્તિષ્ઠન્તુ । મૂર્ધ્ન્યાદિત્યાસ્તિષ્ઠન્તુ
। શિરસિ મહાદેવસ્તિષ્ઠતુ । શિખાયાં વામદેવસ્તિષ્ઠતુ । પૃષ્ઠે પિનાકી તિષ્ઠતુ ।
પુરતઃ શૂલી તિષ્ઠતુ । પાર્શ્વયોઃ શિવાશઙ્કરૌ તિષ્ઠેતામ્ । સર્વતો વાયુસ્તિષ્ઠતુ । તતો
બહિઃ સર્વતોઽગ્નિર્જ્વાલામાલા પરિવૃતસ્તિષ્ઠતુ । સર્વેષ્વઙ્ગેષુ સર્વા દેવતા યથાસ્થાનં
તિષ્ઠન્તુ । માગ્ં રક્ષન્તુ । સર્વાન્ મહાજનાન્ રક્ષન્તુ ॥

ૐ અગ્નિર્મે વાચિ શ્રિતઃ । વાગ્ધૃદયે । હૃદયં મયિ । અહમમૃતે ।

અમૃતં બ્રહ્મણિ । વાયુર્મે પ્રાણે શ્રિતઃ । પ્રાણો હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । સૂર્યો મે ચક્ષુષિ શ્રિતઃ । ચક્ષુર્હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । ચન્દ્રમા મે મનસિ શ્રિતઃ । મનો હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । દિશો મે શ્રોત્રે શ્રિતાઃ । શ્રોત્રગ્ં હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । આપો મે રેતસિ શ્રિતાઃ । રેતો હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । પૃથિવી મે શરીરે શ્રિતા । શરીરગ્ં હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । ઓષધિવનસ્પતયો મે લોમસુ શ્રિતાઃ । લોમાનિ હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । ઇન્દ્રો મે બલે શ્રિતઃ । બલગ્ં હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । પર્જન્યો મે મૂર્ધ્નિ શ્રિતઃ । મૂર્ધા હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । ઈશાનો મે મન્યૌ શ્રિતઃ । મન્યુર્હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । આત્મા મ આત્મનિ શ્રિતઃ । આત્મા હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । પુનર્મ આત્મા પુનરાયુરાગાત્ । પુનઃ પ્રાણઃ પુનરાકૂતમાગાત્ । વૈશ્વાનરો રશ્મિભિર્વાવૃધાનઃ । અન્તસ્તિષ્ઠત્વમૃતસ્ય ગોપાઃ ॥

અસ્ય શ્રી રુદ્રાધ્યાય પ્રશ્ન મહામન્ત્રસ્ય અઘોર ઋષિઃ, અનુષ્ટુપ્ છન્દઃ, સઙ્કર્ષણમૂર્તિસ્વરૂપો યોઽસાવાદિત્યઃ પરમપુરુષઃ સ એષ રુદ્રો દેવતા । નમઃ શિવાયેતિ બીજમ્ । શિવતરાયેતિ શક્તિઃ । મહાદેવાયેતિ કીલકમ્ । શ્રી સામ્બસદાશિવ પ્રસાદ સિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

ૐ અગ્નિહોત્રાત્મને અઙ્ગુષ્ઠાભ્યાં નમઃ । દર્શપૂર્ણમાસાત્મને તર્જનીભ્યાં નમઃ । ચાતુર્માસ્યાત્મને મધ્યમાભ્યાં નમઃ । નિરૂઢપશુબન્ધાત્મને અનામિકાભ્યાં નમઃ । જ્યોતિષ્ટોમાત્મને કનિષ્ઠિકાભ્યાં નમઃ । સર્વક્રત્વાત્મને કરતલકરપૃષ્ઠાભ્યાં નમઃ । અગ્નિહોત્રાત્મને હૃદયાય નમઃ । દર્શપૂર્ણમાસાત્મને શિરસે સ્વાહા । ચાતુર્માસ્યાત્મને શિખાયૈ વષટ્ । નિરૂઢપશુબન્ધાત્મને કવચાય હુમ્ । જ્યોતિષ્ટોમાત્મને નેત્રત્રયાય વૌષટ્ । સર્વક્રત્વાત્મને અસ્ત્રાય ફટ્ । ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ।

## ॥ ધ્યાનમ્ ॥

આપાતાળ-નભઃ સ્થલાન્ત-ભુવન-બ્રહ્માણ્ડ-માવિસ્ફુર-
જ્જ્યોતિઃ સ્ફાટિક-લિઙ્ગ-મૌળિ-વિલસત્પૂર્ણેન્દુ-વાન્તામૃતૈઃ ।
અસ્તોકાપ્લુત-મેક-મીશ-મનિશં રુદ્રાનુવાકાઞ્જપન્
ધ્યાયે-દીપ્સિત-સિદ્ધયે ધ્રુવપદં વિપ્રોઽભિષિઞ્ચે-ચ્છિવમ્ ॥

બ્રહ્માણ્ડવ્યાપ્તદેહા ભસિતહિમરુચા ભાસમાના ભુજઙ્ગૈઃ
કણ્ઠે કાલાઃ કપર્દાકલિત શશિકલા-શ્ચણ્ડકોદણ્ડ હસ્તાઃ ॥

ત્ર્યક્ષા રુદ્રાક્ષમાલાઃ પ્રકટિતવિભવાઃ શામ્ભવા મૂર્તિભેદા
રુદ્રાઃ શ્રીરુદ્રસૂક્ત-પ્રકટિતવિભવા નઃ પ્રયચ્છન્તુ સૌખ્યમ્ ॥

ૐ ગણાનાં ત્વા ગણપતિગ્ં હવામહે કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત આ નઃ શૃણ્વન્નૂતિભિસ્સીદ સાદનમ્
॥ મહાગણપતયે નમઃ ॥

ૐ શં ચ મે મયશ્ચ મે પ્રિયં ચ મેઽનુકામશ્ચ મે કામશ્ચ મે
સૌમનસશ્ચ મે ભદ્રં ચ મે શ્રેયશ્ચ મે વસ્યશ્ચ મે યશશ્ચ
મે ભગશ્ચ મે દ્રવિણં ચ મે યન્તા ચ મે ધર્તા ચ મે ક્ષેમશ્ચ મે
ધૃતિશ્ચ મે વિશ્વં ચ મે મહશ્ચ મે સંવિચ્ચ મે જ્ઞાત્રં ચ મે
સૂશ્ચ મે પ્રસૂશ્ચ મે સીરં ચ મે લયશ્ચ મ ઋતં ચ મેઽમૃતં ચ
મેઽયક્ષ્મં ચ મેઽનામયચ્ચ મે જીવાતુશ્ચ મે દીર્ઘાયુત્વં ચ મેઽનમિત્રં
ચ મેઽભયં ચ મે સુગં ચ મે શયનં ચ મે સૂષા ચ મે સુદિનં
ચ મે ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ શિવોપાસન મન્ત્રાઃ ॥

નિધનપતયે નમઃ । નિધનપતાન્તિકાય નમઃ । ઊર્ધ્વાય નમઃ । ઊર્ધ્વલિઙ્ગાય નમઃ
। હિરણ્યાય નમઃ । હિરણ્યલિઙ્ગાય નમઃ । સુવર્ણાય નમઃ । સુવર્ણલિઙ્ગાય નમઃ ।
દિવ્યાય નમઃ । દિવ્યલિઙ્ગાય નમઃ । ભવાય નમઃ । ભવલિઙ્ગાય નમઃ । શર્વાય
નમઃ । શર્વલિઙ્ગાય નમઃ । શિવાય નમઃ । શિવલિઙ્ગાય નમઃ । જ્વલાય નમઃ ।
જ્વલલિઙ્ગાય નમઃ । આત્માય નમઃ । આત્મલિઙ્ગાય નમઃ । પરમાય નમઃ । પરમલિઙ્ગાય

નમઃ । એતથ્સોમસ્ય સૂર્યસ્ય સર્વલિઙ્ગગ્ં સ્થાપયતિ પાણિમન્ત્રં પવિત્રમ્ ॥

સદ્યોજાતં પ્રપદ્યામિ સદ્યોજાતાય વૈ નમો નમઃ । ભવે ભવે
નાતિભવે ભવસ્વ મામ્ । ભવોદ્ભવાય નમઃ ॥ વામદેવાય નમો
જ્યેષ્ઠાય નમશ્શ્રેષ્ઠાય નમો રુદ્રાય નમઃ કાલાય નમઃ
કલવિકરણાય નમો બલવિકરણાય નમો બલાય નમો બલપ્રમથનાય
નમસ્સર્વભૂતદમનાય નમો મનોન્મનાય નમઃ ॥ અઘોરેભ્યોઽથ
ઘોરેભ્યો ઘોરઘોરતરેભ્યઃ । સર્વેભ્યઃ સર્વશર્વેભ્યો નમસ્તે
અસ્તુ રુદ્રરૂપેભ્યઃ ॥ તત્પુરુષાય વિદ્મહે મહાદેવાય ધીમહિ । તન્નો
રુદ્રઃ પ્રચોદયાત્ ॥ ઈશાન-સ્સર્વવિદ્યાના-મીશ્વર-સ્સર્વ ભૂતાનાં
બ્રહ્માઽધિપતિર્બ્રહ્મણોઽધિપતિર્બ્રહ્મા શિવો મે અસ્તુ સદાશિવોમ્ ॥

નમો હિરણ્યબાહવે હિરણ્યવર્ણાય હિરણ્યરૂપાય હિરણ્યપતયેઽમ્બિકાપતય ઉમાપતયે પશુપતયે
નમો નમઃ । ઋતગ્ં સત્યં પરં બ્રહ્મ પુરુષં કૃષ્ણપિઙ્ગલમ્ ।
ઊર્ધ્વરેતં વિરૂપાક્ષં વિશ્વરૂપાય વૈ નમો નમઃ ॥ સર્વો વૈ
રુદ્ર-સ્તસ્મૈ રુદ્રાય નમો અસ્તુ । પુરુષો વૈ રુદ્ર-સ્સન્મહો નમો
નમઃ । વિશ્વં ભૂતં ભુવનં ચિત્રં બહુધા જાતં જાયમાનં ચ યત્ ।
સર્વો હ્યેષ રુદ્ર-સ્તસ્મૈ રુદ્રાય નમો અસ્તુ । કદ્રુદ્રાય પ્રચેતસે
મીઢુષ્ટમાય તવ્યસે । વો ચેમ શન્તમગ્ં હૃદે । સર્વો હ્યેષ
રુદ્ર-સ્તસ્મૈ રુદ્રાય નમો અસ્તુ ॥

## ॥ શ્રી રુદ્રપ્રશ્નઃ ॥

ૐ નમો ભગવતે રુદ્રાય ॥

ૐ નમસ્તે રુદ્ર મન્યવ ઉતોત ઇષવે નમઃ । નમસ્તે અસ્તુ ધન્વને
બાહુભ્યામુત તે નમઃ । યા ત ઇષુઃ શિવતમા શિવં બભૂવ તે
ધનુઃ । શિવા શરવ્યા યા તવ તયા નો રુદ્ર મૃડય । યા તે રુદ્ર શિવા
તનૂરઘોરાઽપાપકાશિની । તયા નસ્તનુવા શન્તમયા ગિરિશન્તાભિચાકશીહિ
। યામિષું ગિરિશન્ત હસ્તે બિભર્ષ્યસ્તવે । શિવાં ગિરિત્ર તાં કુરુ મા

હિગ્ંસીઃ પુરુષં જગત્ । શિવેન વચસા ત્વા ગિરિશાચ્છાવદામસિ । યથા
નઃ સર્વમિજ્જગદયક્ષ્મગ્ં સુમના અસત્ । અધ્યવોચદધિવક્તા પ્રથમો
દૈવ્યો ભિષક્ । અહીગ્શ્ચ સર્વાઞ્જમ્ભયન્ત્સર્વાશ્ચ યાતુધાન્યઃ । અસૌ
યસ્તામ્રો અરુણ ઉત બભ્રુઃ સુમઙ્ગલઃ । યે ચેમાગ્ં રુદ્રા અભિતો દિક્ષુ
શ્રિતાઃ સહસ્રશોઽવૈષાગ્ં હેડ ઈમહે । અસૌ યોઽવસર્પતિ નીલગ્રીવો
વિલોહિતઃ । ઉતૈનં ગોપા અદૃશન્નદૃશન્નુદહાર્યઃ । ઉતૈનં વિશ્વા
ભૂતાનિ સ દૃષ્ટો મૃડયાતિ નઃ । નમો અસ્તુ નીલગ્રીવાય સહસ્રાક્ષાય
મીઢુષે । અથો યે અસ્ય સત્ત્વાનોઽહં તેભ્યોઽકરન્નમઃ । પ્રમુઞ્ચ
ધન્વનસ્ત્વમુભયોરાર્ત્નિયોર્જ્યામ્ । યાશ્ચ તે હસ્ત ઇષવઃ પરા તા
ભગવો વપ । અવતત્ય ધનુસ્તવગ્ં સહસ્રાક્ષ શતેષુધે । નિશીર્ય
શલ્યાનાં મુખા શિવો નઃ સુમના ભવ । વિજ્યં ધનુઃ કપર્દિનો
વિશલ્યો બાણવાગ્ં ઉત । અનેશન્નસ્યેષવ આભુરસ્ય નિષંગથિઃ
। યા તે હેતિર્મીઢુષ્ટમ હસ્તે બભૂવ તે ધનુઃ । તયાઽસ્માન્,
વિશ્વતસ્ત્વમયક્ષ્મયા પરિબ્ભુજ । નમસ્તે અસ્ત્વાયુધાયાનાતતાય
ધૃષ્ણવે । ઉભાભ્યામુત તે નમો બાહુભ્યાં તવ ધન્વને । પરિ
તે ધન્વનો હેતિરસ્માન્વૃણક્તુ વિશ્વતઃ । અથો ય ઇષુધિસ્તવારે
અસ્મન્નિધેહિ તમ્ ॥ ૧ ॥

શમ્ભવે નમઃ । નમસ્તે અસ્તુ ભગવન્વિશ્વેશ્વરાય મહાદેવાય ત્ર્યમ્બકાય
ત્રિપુરાન્તકાય ત્રિકાગ્નિકાલાય કાલાગ્નિરુદ્રાય નીલકણ્ઠાય મૃત્યુઞ્જયાય
સર્વેશ્વરાય સદાશિવાય શ્રીમન્મહાદેવાય નમઃ ॥

નમો હિરણ્યબાહવે સેનાન્યે દિશાં ચ પતયે નમો નમો વૃક્ષેભ્યો
હરિકેશેભ્યઃ પશૂનાં પતયે નમો નમઃ સસ્પિઞ્જરાય ત્વિષીમતે
પથીનાં પતયે નમો નમો બભ્લુશાય વિવ્યાધિનેઽન્નાનાં પતયે નમો
નમો હરિકેશાયોપવીતિને પુષ્ટાનાં પતયે નમો નમો ભવસ્ય હેત્યૈ
જગતાં પતયે નમો નમો રુદ્રાયાતતાવિને ક્ષેત્રાણાં પતયે નમો
નમઃ સૂતાયાહન્ત્યાય વનાનાં પતયે નમો નમો રોહિતાય સ્થપતયે
વૃક્ષાણાં પતયે નમો નમો મન્ત્રિણે વાણિજાય કક્ષાણાં પતયે

નમો નમો ભુવંતયે વારિવસ્કૃતાયૌષધીનાં પતયે નમો નમ
ઉચ્ચૈર્ઘોષાયાક્રન્દયતે પત્તીનાં પતયે નમો નમઃ કૃત્સ્નવીતાય
ધાવતે સત્ત્વનાં પતયે નમઃ ॥ ૨ ॥

નમઃ સહમાનાય નિવ્યાધિન આવ્યાધિનીનાં પતયે નમો નમઃ કકુભાય
નિષઙ્ગિણે સ્તેનાનાં પતયે નમો નમો નિષઙ્ગિણ ઇષુધિમતે
તસ્કરાણાં પતયે નમો નમો વઞ્ચતે પરિવઞ્ચતે સ્તાયૂનાં પતયે
નમો નમો નિચેરવે પરિચરાયારણ્યાનાં પતયે નમો નમઃ સૃકાવિભ્યો
જિઘાગ્ંસદ્ભ્યો મુષ્ણતાં પતયે નમો નમોઽસિમદ્ભ્યો નક્તઞ્ચરદ્ભ્યઃ
પ્રકૃન્તાનાં પતયે નમો નમ ઉષ્ણીષિણે ગિરિચરાય કુલુઞ્ચાનાં
પતયે નમો નમ ઇષુમદ્ભ્યો ધન્વાવિભ્યશ્ચ વો નમો નમ આતન્વાનેભ્યઃ
પ્રતિદધાનેભ્યશ્ચ વો નમો નમ આયચ્છદ્ભ્યો વિસૃજદ્ભ્યશ્ચ વો નમો
નમોઽસ્યદ્ભ્યો વિધ્યદ્ભ્યશ્ચ વો નમો નમ આસીનેભ્યઃ શયાનેભ્યશ્ચ
વો નમો નમઃ સ્વપદ્ભ્યો જાગ્રદ્ભ્યશ્ચ વો નમો નમસ્તિષ્ઠદ્ભ્યો
ધાવદ્ભ્યશ્ચ વો નમો નમઃ સભાભ્યઃ સભાપતિભ્યશ્ચ વો નમો નમો
અશ્વેભ્યોઽશ્વપતિભ્યશ્ચ વો નમઃ ॥ ૩ ॥

નમ આવ્યધિનીભ્યો વિવિધ્યન્તીભ્યશ્ચ વો નમો નમ
ઉગણાભ્યસ્તૃગ્ંહતીભ્યશ્ચ વો નમો નમો ગૃત્સેભ્યો ગૃત્સપતિભ્યશ્ચ
વો નમો નમો વ્રાતેભ્યો વ્રાતપતિભ્યશ્ચ વો નમો નમો ગણેભ્યો
ગણપતિભ્યશ્ચ વો નમો નમો વિરૂપેભ્યો વિશ્વરૂપેભ્યશ્ચ વો નમો નમો
મહદ્ભ્યઃ, ક્ષુલ્લકેભ્યશ્ચ વો નમો નમો રથિભ્યોઽરથેભ્યશ્ચ
વો નમો નમો રથેભ્યો રથપતિભ્યશ્ચ વો નમો નમઃ સેનાભ્યઃ
સેનાનિભ્યશ્ચ વો નમો નમઃ, ક્ષત્તૃભ્યઃ સંગ્રહીતૃભ્યશ્ચ વો નમો
નમસ્તક્ષભ્યો રથકારેભ્યશ્ચ વો નમો નમઃ કુલાલેભ્યઃ કર્મારેભ્યશ્ચ
વો નમો નમઃ પુઞ્જિષ્ટેભ્યો નિષાદેભ્યશ્ચ વો નમો નમ ઇષુકૃદ્ભ્યો
ધન્વકૃદ્ભ્યશ્ચ વો નમો નમો મૃગયુભ્યઃ શ્વનિભ્યશ્ચ વો નમો
નમઃ શ્વભ્યઃ શ્વપતિભ્યશ્ચ વો નમઃ ॥ ૪ ॥

નમો ભવાય ચ રુદ્રાય ચ નમઃ શર્વાય ચ પશુપતયે ચ નમો

નીલગ્રીવાય ચ શિતિકણ્ઠાય ચ નમઃ કપર્દિને ચ વ્યુપ્તકેશાય ચ નમઃ
સહસ્રાક્ષાય ચ શતધન્વને ચ નમો ગિરિશાય ચ શિપિવિષ્ટાય ચ
નમો મીઢુષ્ટમાય ચેષુમતે ચ નમો હ્રસ્વાય ચ વામનાય ચ નમો
બૃહતે ચ વર્ષીયસે ચ નમો વૃદ્ધાય ચ સંવૃધ્વને ચ નમો
અગ્રિયાય ચ પ્રથમાય ચ નમ આશવે ચાજિરાય ચ નમઃ શીઘ્રિયાય
ચ શીભ્યાય ચ નમ ઊર્મ્યાય ચાવસ્વન્યાય ચ નમઃ સ્રોતસ્યાય ચ
દ્વીપ્યાય ચ ॥ ૫ ॥

નમો જ્યેષ્ઠાય ચ કનિષ્ઠાય ચ નમઃ પૂર્વજાય ચાપરજાય ચ
નમો મધ્યમાય ચાપગલ્ભાય ચ નમો જઘન્યાય ચ બુધ્નિયાય ચ
નમઃ સોભ્યાય ચ પ્રતિસર્યાય ચ નમો યામ્યાય ચ ક્ષેમ્યાય ચ
નમ ઉર્વર્યાય ચ ખલ્યાય ચ નમઃ શ્લોક્યાય ચાઽવસાન્યાય ચ
નમો વન્યાય ચ કક્ષ્યાય ચ નમઃ શ્રવાય ચ પ્રતિશ્રવાય ચ
નમ આશુષેણાય ચાશુરથાય ચ નમઃ શૂરાય ચાવભિન્દતે ચ નમો
વર્મિણે ચ વરૂથિને ચ નમો બિલ્મિને ચ કવચિને ચ નમઃ શ્રુતાય
ચ શ્રુતસેનાય ચ ॥ ૬ ॥

નમો દુન્દુભ્યાય ચાહનન્યાય ચ નમો ધૃષ્ણવે ચ પ્રમૃશાય
ચ નમો દૂતાય ચ પ્રહિતાય ચ નમો નિષઙ્ગિણે ચેષુધિમતે
ચ નમસ્તીક્ષ્ણેષવે ચાયુધિને ચ નમઃ સ્વાયુધાય ચ સુધન્વને
ચ નમઃ સ્રુત્યાય ચ પથ્યાય ચ નમઃ કાટ્યાય ચ નીપ્યાય ચ
નમઃ સૂદ્યાય ચ સરસ્યાય ચ નમો નાદ્યાય ચ વૈશન્તાય ચ નમઃ
કૂપ્યાય ચાવટ્યાય ચ નમો વર્ષ્યાય ચાવર્ષ્યાય ચ નમો મેઘ્યાય
ચ વિદ્યુત્યાય ચ નમ ઈધ્રિયાય ચાતપ્યાય ચ નમો વાત્યાય ચ
રેષ્મિયાય ચ નમો વાસ્તવ્યાય ચ વાસ્તુ પાય ચ ॥ ૭ ॥

નમઃ સોમાય ચ રુદ્રાય ચ નમસ્તામ્રાય ચારુણાય ચ નમઃ શઙ્ગાય
ચ પશુપતયે ચ નમ ઉગ્રાય ચ ભીમાય ચ નમો અગ્રેવધાય
ચ દૂરેવધાય ચ નમો હન્ત્રે ચ હનીયસે ચ નમો વૃક્ષેભ્યો
હરિકેશેભ્યો નમસ્તારાય નમશ્શમ્ભવે ચ મયોભવે ચ નમઃ

શઙ્કુરાય ચ મયસ્કરાય ચ નમઃ શિવાય ચ શિવતરાય ચ
નમસ્તીર્થ્યાય ચ કૂલ્યાય ચ નમઃ પાર્યાય ચાવાર્યાય ચ નમઃ
પ્રતરણાય ચોત્તરણાય ચ નમ આતાર્યાય ચાલાદ્યાય ચ નમઃ
શષ્પ્યાય ચ ફેન્યાય ચ નમઃ સિકત્યાય ચ પ્રવાહ્યાય ચ ॥ ૮ ॥

નમ ઇરિણ્યાય ચ પ્રપથ્યાય ચ નમઃ કિગ્ંશિલાય ચ ક્ષયણાય ચ
નમઃ કપર્દિને ચ પુલસ્તયે ચ નમો ગોષ્ઠ્યાય ચ ગૃહ્યાય ચ
નમસ્તલ્પ્યાય ચ ગેહ્યાય ચ નમઃ કાટ્યાય ચ ગહ્વરેષ્ઠાય ચ નમો
હ્રદય્યાય ચ નિવેષ્પ્યાય ચ નમઃ પાગ્ં સવ્યાય ચ રજસ્યાય ચ નમઃ
શુષ્ક્યાય ચ હરિત્યાય ચ નમો લોપ્યાય ચોલપ્યાય ચ નમ ઊર્વ્યાય
ચ સૂર્મ્યાય ચ નમઃ પર્ણ્યાય ચ પર્ણશદ્યાય ચ નમોઽપગુરમાણાય
ચાભિઘ્નતે ચ નમ આખ્ખિદતે ચ પ્રખ્ખિદતે ચ નમો વઃ કિરિકેભ્યો
દેવાનાગ્ં હૃદયેભ્યો નમો વિક્ષીણકેભ્યો નમો વિચિન્વત્કેભ્યો નમ
આનિર્હતેભ્યો નમ આમીવત્કેભ્યઃ ॥ ૯ ॥

દ્રાપે અન્ધસસ્પતે દરિદ્રન્નીલલોહિત । એષાં પુરુષાણામેષાં પશૂનાં
મા ભેર્માઽરો મો એષાં કિઞ્ચનામમત્ । યા તે રુદ્ર શિવા તનૂઃ શિવા
વિશ્વાહભેષજી । શિવા રુદ્રસ્ય ભેષજી તયા નો મૃડ જીવસે । ઇમાગ્ં
રુદ્રાય તવસે કપર્દિને ક્ષયદ્વીરાય પ્રભરામહે મતિમ્ । યથા
નઃ શમસદ્દ્વિપદે ચતુષ્પદે વિશ્વં પુષ્ટં ગ્રામે અસ્મિન્નનાતુરમ્
। મૃડા નો રુદ્રોત નો મયસ્કૃધિ ક્ષયદ્વીરાય નમસા વિધેમ તે ।
યચ્છં ચ યોશ્ચ મનુરાયજે પિતા તદશ્યામ તવ રુદ્ર પ્રણીતૌ ।
મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા ન ઉક્ષિતમ્ ।
મા નોઽવધીઃ પિતરં મોત માતરં પ્રિયા મા નસ્તનુવો રુદ્ર રીરિષઃ । મા
નસ્તોકે તનયે મા ન આયુષિ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ । વીરાન્મા
નો રુદ્ર ભામિતોઽવધીર્હવિષ્મન્તો નમસા વિધેમ તે । આરાત્તે ગોઘ્ન ઉત
પૂરુષઘ્ને ક્ષયદ્વીરાય સુમ્નમસ્મે તે અસ્તુ । રક્ષા ચ નો અધિ ચ દેવ
બ્રૂહ્યધા ચ નઃ શર્મ યચ્છ દ્વિબર્હાઃ । સ્તુહિ શ્રુતં ગર્તસદં
યુવાનં મૃગન્ન ભીમમુપહત્નુમુગ્રમ્ । મૃડા જરિત્રે રુદ્ર સ્તવાનો

અન્યન્તે અસ્મન્નિવપન્તુ સેનાઃ । પરિણો રુદ્રસ્ય હેતિર્વૃણક્તુ
પરિ ત્વેષસ્ય દુર્મતિ રઘાયોઃ । અવ સ્થિરા મઘવદ્ભ્યસ્તનુષ્વ
મીઢ્વસ્તોકાય તનયાય મૃડય । મીઢુષ્ટમ શિવતમ શિવો નઃ સુમના
ભવ । પરમે વૃક્ષ આયુધન્નિધાય કૃત્તિં વસાન આચર પિનાકં
બિભ્રદાગહિ । વિકિરિદ વિલોહિત નમસ્તે અસ્તુ ભગવઃ । યાસ્તે સહસ્રગ્ં
હેતયોન્યમસ્મન્નિવપન્તુ તાઃ । સહસ્રાણિ સહસ્રધા બાહુવોસ્તવ હેતયઃ
। તાસામીશાનો ભગવઃ પરાચીના મુખા કૃધિ ॥ ૧૦ ॥

સહસ્રાણિ સહસ્રશો યે રુદ્રા અધિ ભૂમ્યામ્ । તેષાગ્ં સહસ્રયોજનેઽવધન્વાનિ
તન્મસિ । અસ્મિન્મહત્યર્ણવેઽન્તરિક્ષે ભવા અધિ । નીલગ્રીવાઃ
શિતિકણ્ઠાઃ શર્વા અધઃ, ક્ષમાચરાઃ । નીલગ્રીવાઃ શિતિકણ્ઠા દિવગ્ં
રુદ્રા ઉપશ્રિતાઃ । યે વૃક્ષેષુ સસ્પિઞ્જરા નીલગ્રીવા વિલોહિતાઃ ।
યે ભૂતાનામધિપતયો વિશિખાસઃ કપર્દિનઃ । યે અન્નેષુ વિવિધ્યન્તિ
પાત્રેષુ પિબતો જનાન્ । યે પથાં પથિરક્ષય ઐલબૃદા યવ્યુધઃ
। યે તીર્થાનિ પ્રચરન્તિ સૃકાવન્તો નિષઙ્ગિણઃ । ય એતાવન્તશ્ચ
ભૂયાગ્ંસશ્ચ દિશો રુદ્રા વિતસ્થિરે । તેષાગ્ં સહસ્રયોજનેઽવધન્વાનિ
તન્મસિ । નમો રુદ્રેભ્યો યે પૃથિવ્યાં યેઽન્તરિક્ષે યે દિવિ યેષામન્નં
વાતો વર્ષમિષવસ્તેભ્યો દશ પ્રાચીર્દશ દક્ષિણા દશ
પ્રતીચીર્દશોદીચીર્દશોર્ધ્વાસ્તેભ્યો નમસ્તે નો મૃડયન્તુ તે યં દ્વિષ્મો
યશ્ચ નો દ્વેષ્ટિ તં વો જમ્ભે દધામિ ॥ ૧૧ ॥

ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ । ઉર્વારુકમિવ
બન્ધનાન્મૃત્યોર્મુક્ષીય માઽમૃતાત્ । યો રુદ્રો અગ્નૌ યો અપ્સુ ય ઓષધીષુ
યો રુદ્રો વિશ્વા ભુવના વિવેશ તસ્મૈ રુદ્રાય નમો અસ્તુ । તમુ ષ્ટુહિ
યઃ સ્વિષુઃ સુધન્વા યો વિશ્વસ્ય ક્ષયતિ ભેષજસ્ય । યક્ષ્વામહે
સૌમનસાય રુદ્રં નમોભિર્દેવમસુરં દુવસ્ય । અયં મે હસ્તો ભગવાનયં
મે ભગવત્તરઃ । અયં મે વિશ્વભેષજોઽયગ્ં શિવાભિમર્શનઃ । યે તે
સહસ્રમયુતં પાશા મૃત્યો મર્ત્યાય હન્તવે । તાન્ યજ્ઞસ્ય માયયા
સર્વાનવ યજામહે । મૃત્યવે સ્વાહા મૃત્યવે સ્વાહા । ૐ નમો ભગવતે રુદ્રાય

વિષ્ણવે મૃત્યુર્મે પાહિ ॥

પ્રાણાનાં ગ્રન્થિરસિ રુદ્રો મા વિશાન્તકઃ । તેનાન્નેનાપ્યાયસ્વ । સદાશિવોમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ ચમકપ્રશ્નઃ ॥

ૐ અગ્નાવિષ્ણૂ સજોષસેમા વર્ધન્તુ વાં ગિરઃ । દ્યુમ્નૈર્વાજેભિરાગતમ્ ।
વાજશ્ચ મે પ્રસવશ્ચ મે પ્રયતિશ્ચ મે પ્રસિતિશ્ચ મે ધીતિશ્ચ મે
ક્રતુશ્ચ મે સ્વરશ્ચ મે શ્લોકશ્ચ મે શ્રાવશ્ચ મે શ્રુતિશ્ચ મે
જ્યોતિશ્ચ મે સુવશ્ચ મે પ્રાણશ્ચ મેઽપાનશ્ચ મે વ્યાનશ્ચ મેઽસુશ્ચ
મે ચિત્તં ચ મ આધીતં ચ મે વાક્ચ મે મનશ્ચ મે ચક્ષુશ્ચ મે
શ્રોત્રં ચ મે દક્ષશ્ચ મે બલં ચ મ ઓજશ્ચ મે સહશ્ચ મ
આયુશ્ચ મે જરા ચ મ આત્મા ચ મે તનૂશ્ચ મે શર્મ ચ મે વર્મ
ચ મેઽઙ્ગાનિ ચ મેઽસ્થાનિ ચ મે પરૂꣳષિ ચ મે શરીરાણિ ચ મે ॥ ૧॥
જ્યૈષ્ઠ્યં ચ મ આધિપત્યં ચ મે મન્યુશ્ચ મે ભામશ્ચ મેઽમશ્ચ
મેઽમ્ભશ્ચ મે જેમા ચ મે મહિમા ચ મે વરિમા ચ મે પ્રથિમા ચ મે
વર્ષ્મા ચ મે દ્રાઘુયા ચ મે વૃદ્ધં ચ મે વૃદ્ધિશ્ચ મે સત્યં ચ
મે શ્રદ્ધા ચ મે જગચ્ચ મે ધનં ચ મે વશશ્ચ મે ત્વિષિશ્ચ
મે ક્રીડા ચ મે મોદશ્ચ મે જાતં ચ મે જનિષ્યમાણં ચ મે સૂક્તં ચ
મે સુકૃતં ચ મે વિત્તં ચ મે વેદ્યં ચ મે ભૂતં ચ મે ભવિષ્યચ્ચ
મે સુગં ચ મે સુપથં ચ મ ઋદ્ધં ચ મ ઋદ્ધિશ્ચ મે ક્લૃપ્તં ચ
મે ક્લૃપ્તિશ્ચ મે મતિશ્ચ મે સુમતિશ્ચ મે ॥ ૨॥
શં ચ મે મયશ્ચ મે પ્રિયં ચ મેઽનુકામશ્ચ મે કામશ્ચ મે
સૌમનસશ્ચ મે ભદ્રં ચ મે શ્રેયશ્ચ મે વસ્યશ્ચ મે યશશ્ચ
મે ભગશ્ચ મે દ્રવિણં ચ મે યન્તા ચ મે ધર્તા ચ મે ક્ષેમશ્ચ
મે ધૃતિશ્ચ મે વિશ્વં ચ મે મહશ્ચ મે સંવિચ્ચ મે જ્ઞાત્રં
ચ મે સૂશ્ચ મે પ્રસૂશ્ચ મે સીરં ચ મે લયશ્ચ મ ઋતં ચ
મેઽમૃતં ચ મેઽયક્ષ્મં ચ મેઽનામયચ્ચ મે જીવાતુશ્ચ મે દીર્ઘાયુત્વં

ચ મેઽનમિત્રં ચ મેઽભયં ચ મે સુગં ચ મે શયનં ચ મે સૂષા ચ
મે સુદિનં ચ મે ॥ ૩॥

ઊર્ક્ચ મે સૂનૃતા ચ મે પયશ્ચ મે રસશ્ચ મે ઘૃતં ચ મે
મધુ ચ મે સગ્ધિશ્ચ મે સપીતિશ્ચ મે કૃષિશ્ચ મે વૃષ્ટિશ્ચ
મે જૈત્રં ચ મ ઔદ્ભિદ્યં ચ મે રયિશ્ચ મે રાયશ્ચ મે પુષ્ટં ચ
મે પુષ્ટિશ્ચ મે વિભુ ચ મે પ્રભુ ચ મે બહુ ચ મે ભૂયશ્ચ મે
પૂર્ણં ચ મે પૂર્ણતરં ચ મેઽક્ષિતિશ્ચ મે કૂયવાશ્ચ મેઽન્નં ચ
મેઽક્ષુચ્ચ મે વ્રીહયશ્ચ મે યવાશ્ચ મે માષાશ્ચ મે તિલાશ્ચ મે
મુદ્ગાશ્ચ મે ખલ્વાશ્ચ મે ગોધૂમાશ્ચ મે મસુરાશ્ચ મે પ્રિયંગવશ્ચ
મેઽણવશ્ચ મે શ્યામકાશ્ચ મે નીવારાશ્ચ મે ॥ ૪॥

અશ્મા ચ મે મૃત્તિકા ચ મે ગિરયશ્ચ મે પર્વતાશ્ચ મે સિકતાશ્ચ મે
વનસ્પતયશ્ચ મે હિરણ્યં ચ મેઽયશ્ચ મે સીસં ચ મે ત્રપુશ્ચ
મે શ્યામં ચ મે લોહં ચ મેઽગ્નિશ્ચ મ આપશ્ચ મે વીરુધશ્ચ મ
ઓષધયશ્ચ મે કૃષ્ટપચ્યં ચ મેઽકૃષ્ટપચ્યં ચ મે ગ્રામ્યાશ્ચ મે
પશવ આરણ્યાશ્ચ યજ્ઞેન કલ્પન્તાં વિત્તં ચ મે વિત્તિશ્ચ મે ભૂતં
ચ મે ભૂતિશ્ચ મે વસુ ચ મે વસતિશ્ચ મે કર્મ ચ મે શક્તિશ્ચ
મેઽર્થશ્ચ મ એમશ્ચ મ ઇતિશ્ચ મે ગતિશ્ચ મે ॥ ૫॥

અગ્નિશ્ચ મ ઇન્દ્રશ્ચ મે સોમશ્ચ મ ઇન્દ્રશ્ચ મે સવિતા ચ મ
ઇન્દ્રશ્ચ મે સરસ્વતી ચ મ ઇન્દ્રશ્ચ મે પૂષા ચ મ ઇન્દ્રશ્ચ મે
બૃહસ્પતિશ્ચ મ ઇન્દ્રશ્ચ મે મિત્રશ્ચ મ ઇન્દ્રશ્ચ મે વરુણશ્ચ
મ ઇન્દ્રશ્ચ મે ત્વષ્ટા ચ મ ઇન્દ્રશ્ચ મે ધાતા ચ મ ઇન્દ્રશ્ચ મે
વિષ્ણુશ્ચ મ ઇન્દ્રશ્ચ મેઽશ્વિનૌ ચ મ ઇન્દ્રશ્ચ મે મરુતશ્ચ મ
ઇન્દ્રશ્ચ મે વિશ્વે ચ મે દેવા ઇન્દ્રશ્ચ મે પૃથિવી ચ મ ઇન્દ્રશ્ચ
મેઽન્તરિક્ષં ચ મ ઇન્દ્રશ્ચ મે દ્યૌશ્ચ મ ઇન્દ્રશ્ચ મે દિશશ્ચ મ
ઇન્દ્રશ્ચ મે મૂર્ધા ચ મ ઇન્દ્રશ્ચ મે પ્રજાપતિશ્ચ મ ઇન્દ્રશ્ચ મે ॥ ૬॥

અગ્ંશુશ્ચ મે રશ્મિશ્ચ મેઽદાભ્યશ્ચ મેઽધિપતિશ્ચ મ ઉપાગ્ંશુશ્ચ
મેઽન્તર્યામશ્ચ મ ઐન્દ્રવાયવશ્ચ મે મૈત્રાવરુણશ્ચ મ આશ્વિનશ્ચ

મે પ્રતિપ્રસ્થાનશ્ચ મે શુક્રશ્ચ મે મન્થી ચ મ આગ્રયણશ્ચ
મે વૈશ્વદેવશ્ચ મે ધ્રુવશ્ચ મે વૈશ્વાનરશ્ચ મ ઋતુગ્રહાશ્ચ
મેઽતિગ્રાહ્યાશ્ચ મ ઐન્દ્રાગ્નશ્ચ મે વૈશ્વદેવશ્ચ મે મરુત્વતીયાશ્ચ મે
માહેન્દ્રશ્ચ મ આદિત્યશ્ચ મે સાવિત્રશ્ચ મે સારસ્વતશ્ચ મે પૌષ્ણશ્ચ
મે પાત્નીવતશ્ચ મે હારિયોજનશ્ચ મે ॥ ૭॥

ઇધ્મશ્ચ મે બર્હિશ્ચ મે વેદિશ્ચ મે ધિષ્ણિયાશ્ચ મે સ્રુચશ્ચ મે
ચમસાશ્ચ મે ગ્રાવાણશ્ચ મે સ્વરવશ્ચ મ ઉપરવાશ્ચ મેઽધિષવણે ચ
મે દ્રોણકલશશ્ચ મે વાયવ્યાનિ ચ મે પૂતભૃચ્ચ મ આધવનીયશ્ચ મ
આગ્નીધ્રં ચ મે હવિર્ધાનં ચ મે ગૃહાશ્ચ મે સદશ્ચ મે પુરોડાશાશ્ચ
મે પચતાશ્ચ મેઽવભૃથશ્ચ મે સ્વગાકારશ્ચ મે ॥ ૮॥

અગ્નિશ્ચ મે ઘર્મશ્ચ મેઽર્કશ્ચ મે સૂર્યશ્ચ મે પ્રાણશ્ચ
મેઽશ્વમેધશ્ચ મે પૃથિવી ચ મેઽદિતિશ્ચ મે દિતિશ્ચ મે દ્યૌશ્ચ
મે શક્ક્વરીરઙ્ગુલયો દિશશ્ચ મે યજ્ઞેન કલ્પન્તામૃક્ચ મે સામ
ચ મે સ્તોમશ્ચ મે યજુશ્ચ મે દીક્ષા ચ મે તપશ્ચ મ ઋતુશ્ચ
મે વ્રતં ચ મેઽહોરાત્રયોર્વૃષ્ટ્યા બૃહદ્રથન્તરે ચ મે યજ્ઞેન
કલ્પેતામ્ ॥ ૯॥

ગર્ભાશ્ચ મે વત્સાશ્ચ મે ત્ર્યવિશ્ચ મે ત્ર્યવી ચ મે દિત્યવાટ્ ચ મે
દિત્યૌહી ચ મે પઞ્ચાવિશ્ચ મે પઞ્ચાવી ચ મે ત્રિવત્સશ્ચ મે ત્રિવત્સા
ચ મે તુર્યવાટ્ ચ મે તુર્યૌહી ચ મે પષ્ઠવાટ્ ચ મે પષ્ઠૌહી ચ
મ ઉક્ષા ચ મે વશા ચ મ ઋષભશ્ચ મે વેહચ્ચ મેઽનડ્વાઞ્ચ
મે ધેનુશ્ચ મ આયુર્યજ્ઞેન કલ્પતાં પ્રાણો યજ્ઞેન કલ્પતામપાનો
યજ્ઞેન કલ્પતાં વ્યાનો યજ્ઞેન કલ્પતાં ચક્ષુર્યજ્ઞેન કલ્પતાગ્ં
શ્રોત્રં યજ્ઞેન કલ્પતાં મનો યજ્ઞેન કલ્પતાં વાગ્યજ્ઞેન કલ્પતામાત્મા
યજ્ઞેન કલ્પતાં યજ્ઞો યજ્ઞેન કલ્પતામ્ ॥ ૧૦॥

એકા ચ મે તિસ્રશ્ચ મે પઞ્ચ ચ મે સપ્ત ચ મે નવ ચ
મ એકાદશ ચ મે ત્રયોદશ ચ મે પઞ્ચદશ ચ મે સપ્તદશ
ચ મે નવદશ ચ મ એકવિગ્ંશતિશ્ચ મે ત્રયોવિગ્ંશતિશ્ચ મે

પઞ્ચવિગ્ંશતિશ્ચ મે સપ્તવિગ્ંશતિશ્ચ મે નવવિગ્ંશતિશ્ચ મ
એકત્રિગ્ંશચ્ચ મે ત્રયસ્ત્રિગ્ંશચ્ચ મે ચતસ્રશ્ચ મેઽષ્ટૌ ચ મે
દ્વાદશ ચ મે ષોડશ ચ મે વિગ્ંશતિશ્ચ મે ચતુર્વિગ્ંશતિશ્ચ
મેઽષ્ટાવિગ્ંશતિશ્ચ મે દ્વાત્રિગ્ંશચ્ચ મે ષટ્ત્રિગ્ંશચ્ચ મે
ચત્વરિગ્ંશચ્ચ મે ચતુશ્ચત્વારિગ્ંશચ્ચ મેઽષ્ટાચત્વારિગ્ંશચ્ચ
મે વાજશ્ચ પ્રસવશ્ચાપિજશ્ચ ક્રતુશ્ચ સુવશ્ચ મૂર્ધા ચ
વ્યશ્નિયશ્ચાન્ત્યાયનશ્ચાન્ત્યશ્ચ ભૌવનશ્ચ ભુવનશ્ચાધિપતિશ્ચ ॥

૧૧ ॥

ૐ ઇડા દેવહૂર્મનુર્યજ્ઞનીર્બૃહસ્પતિરુક્થામદાનિ શગ્ંસિષદ્વિશ્વેદેવાઃ
સૂક્તવાચઃ પૃથિવીમાતર્મા મા હિગ્ંસીર્મધુ મનિષ્યે મધુ જનિષ્યે મધુ
વક્ષ્યામિ મધુ વદિષ્યામિ મધુમતીં દેવેભ્યો વાચમુદ્યાસગ્ં શુશ્રૂષેણ્યાં
મનુષ્યેભ્યસ્તં મા દેવા અવન્તુ શોભાયૈ પિતરોઽનુમદન્તુ ॥ ૐ શાન્તિઃ
શાન્તિઃ શાન્તિઃ ॥

## ॥ પુરુષસૂક્તમ્ ॥

ૐ તચ્છં યોરાવૃણીમહે । ગાતું યજ્ઞાય । ગાતું યજ્ઞપતયે । દૈવીઃ
સ્વસ્તિરસ્તુ નઃ । સ્વસ્તિર્માનુષેભ્યઃ । ઊર્ધ્વં જિગાતુ ભેષજમ્ । શન્નો
અસ્તુ દ્વિપદે । શં ચતુષ્પદે ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ૐ સહસ્રશીર્ષા પુરુષઃ । સહસ્રાક્ષઃ સહસ્રપાત્ । સ ભૂમિં વિશ્વતો
વૃત્વા । અત્યતિષ્ઠદ્દશાઙ્ગુલમ્ । પુરુષ એવેદગ્ં સર્વમ્ । યદ્ભૂતં યચ્ચ
ભવ્યમ્ । ઉતામૃતત્વસ્યેશાનઃ । યદન્નેનાતિરોહતિ । એતાવાનસ્ય મહિમા ।
અતો જ્યાયાગ્શ્ચ પૂરુષઃ ॥ ૧ ॥

પાદોઽસ્ય વિશ્વા ભૂતાનિ । ત્રિપાદસ્યામૃતં દિવિ । ત્રિપાદૂર્ધ્વ
ઉદૈત્પુરુષઃ । પાદોઽસ્યેહાઽઽભવાત્પુનઃ । તતો વિષ્વઙ્વ્યક્રામત્ ।
સાશનાનશને અભિ । તસ્માદ્વિરાડજાયત । વિરાજો અધિ પૂરુષઃ ।
સ જાતો અત્યરિચ્યત । પશ્ચાદ્ભૂમિમથો પુરઃ ॥ ૨ ॥

યત્પુરુષેણ હવિષા । દેવા યજ્ઞમતન્વત । વસન્તો અસ્યાસીદાજ્યમ્ ।
ગ્રીષ્મ ઇધ્મશ્શરદ્ધવિઃ । સપ્તાસ્યાસન્પરિધયઃ । ત્રિઃ સપ્ત સમિધઃ
કૃતાઃ । દેવા યદ્યજ્ઞં તન્વાનાઃ । અબધ્નન્પુરુષં પશુમ્ । તં યજ્ઞં
બર્હિષિ પ્રૌક્ષન્ । પુરુષં જાતમગ્રતઃ ॥ ૩ ॥

તેન દેવા અયજન્ત । સાધ્યા ઋષયશ્ચ યે । તસ્માદ્યજ્ઞાત્સર્વહુતઃ
। સમ્ભૃતં પૃષદાજ્યમ્ । પશૂગ્સ્તાગ્શ્ચક્રે વાયવ્યાન્ ।
આરણ્યાન્ગ્રામ્યાશ્ચ યે । તસ્માદ્યજ્ઞાત્સર્વહુતઃ । ઋચઃ સામાનિ જજ્ઞિરે ।
છન્દાગ્ંસિ જજ્ઞિરે તસ્માત્ । યજુસ્તસ્માદજાયત ॥ ૪ ॥

તસ્માદશ્વા અજાયન્ત । યે કે ચોભયાદતઃ । ગાવો હ જજ્ઞિરે તસ્માત્ ।
તસ્માજ્જાતા અજાવયઃ । યત્પુરુષં વ્યદધુઃ । કતિધા વ્યકલ્પયન્ ।
મુખં કિમસ્ય કૌ બાહૂ । કાવૂરૂ પાદાવુચ્યેતે । બ્રાહ્મણોઽસ્ય મુખમાસીત્ ।
બાહૂ રાજન્યઃ કૃતઃ ॥ ૫ ॥

ઊરૂ તદસ્ય યદ્વૈશ્યઃ । પદ્ભ્યાગ્ં શૂદ્રો અજાયત । ચન્દ્રમા મનસો જાતઃ
। ચક્ષોઃ સૂર્યો અજાયત । મુખાદિન્દ્રશ્ચાગ્નિશ્ચ । પ્રાણાદ્વાયુરજાયત ।
નાભ્યા આસીદન્તરિક્ષમ્ । શીર્ષ્ણો દ્યૌઃ સમવર્તત । પદ્ભ્યાં ભૂમિર્દિશઃ
શ્રોત્રાત્ । તથા લોકાગ્ં અકલ્પયન્ ॥ ૬ ॥

વેદાહમેતં પુરુષં મહાન્તમ્ । આદિત્યવર્ણં તમસસ્તુ પારે ।
સર્વાણિ રૂપાણિ વિચિત્ય ધીરઃ । નામાનિ કૃત્વાઽભિવદન્, યદાસ્તે
। ધાતા પુરસ્તાદ્યમુદાજહાર । શક્રઃ પ્રવિદ્વાન્પ્રદિશશ્ચતસ્રઃ ।
તમેવં વિદ્વાનમૃત ઇહ ભવતિ । નાન્યઃ પન્થા અયનાય વિદ્યતે । યજ્ઞેન
યજ્ઞમયજન્ત દેવાઃ । તાનિ ધર્માણિ પ્રથમાન્યાસન્ । તે હ નાકં મહિમાનઃ
સચન્તે । યત્ર પૂર્વે સાધ્યાઃ સન્તિ દેવાઃ ॥ ૭ ॥

અદ્ભ્યઃ સમ્ભૂતઃ પૃથિવ્યૈ રસાચ્ચ । વિશ્વકર્મણઃ સમવર્તતાધિ
। તસ્ય ત્વષ્ટા વિદધદ્રૂપમેતિ । તત્પુરુષસ્ય વિશ્વમાજાનમગ્રે
। વેદાહમેતં પુરુષં મહાન્તમ્ । આદિત્યવર્ણં તમસઃ પરસ્તાત્
। તમેવં વિદ્વાનમૃત ઇહ ભવતિ । નાન્યઃ પન્થા વિદ્યતેઽયનાય ।
પ્રજાપતિશ્ચરતિ ગર્ભે અન્તઃ । અજાયમાનો બહુધા વિજાયતે ॥ ૮ ॥

તસ્ય ધીરાઃ પરિજાનન્તિ યોનિમ્ । મરીચીનાં પદમિચ્છન્તિ વેધસઃ ।
યો દેવેભ્ય આતપતિ । યો દેવાનાં પુરોહિતઃ । પૂર્વો યો દેવેભ્યો જાતઃ ।
નમો રુચાય બ્રાહ્મયે । રુચં બ્રાહ્મં જનયન્તઃ । દેવા અગ્રે તદબ્રુવન્ ।
યસ્ત્વૈવં બ્રાહ્મણો વિદ્યાત્ । તસ્ય દેવા અસન્ વશે ॥ ૯ ॥
હ્રીશ્ચ તે લક્ષ્મીશ્ચ પત્ન્યૌ । અહોરાત્રે પાર્શ્વે । નક્ષત્રાણિ રૂપમ્ ।
અશ્વિનૌ વ્યાત્તમ્ । ઇષ્ટં મનિષાણ । અમું મનિષાણ । સર્વં મનિષાણ ॥ ૧૦ ॥

## ॥ દુર્ગા સૂક્તમ્ ॥

ૐ જાતવેદસે સુનવામ સોમ મરાતીયતો નિદહાતિ વેદઃ । સ નઃ પર્ષદતિ
દુર્ગાણિ વિશ્વા નાવેવ સિન્ધું દુરિતાઽત્યગ્નિઃ ॥ તામગ્નિવર્ણાં
તપસા જ્વલન્તીં વૈરોચનીં કર્મફલેષુ જુષ્ટામ્ । દુર્ગાં દેવીગ્ં
શરણમહં પ્રપદ્યે સુતરસિ તરસે નમઃ ॥ અગ્ને ત્વં પારયા નવ્યો
અસ્માન્થ્સ્વસ્તિભિરતિ દુર્ગાણિ વિશ્વા । પૂશ્ચ પૃથ્વી બહુલા ન ઉર્વી
ભવા તોકાય તનયાય શંયોઃ ॥ વિશ્વાનિ નો દુર્ગહા જાતવેદઃ સિન્ધુન્ન નાવા
દુરિતાઽતિપર્ષિ । અગ્ને અત્રિવન્મનસા ગૃણાનોઽસ્માકં બોધ્યવિતા તનૂનામ્
॥ પૃતના જિતગ્ં સહમાનમુગ્રમગ્નિગ્ં હુવેમ પરમાથ્સધસ્થાત્ ।
સ નઃ પર્ષદતિ દુર્ગાણિ વિશ્વા ક્ષામદ્દેવો અતિ દુરિતાઽત્યગ્નિઃ
॥ પ્રત્નોષિ કમીડ્યો અધ્વરેષુ સનાચ્ચ હોતા નવ્યશ્ચ સત્સિ
। સ્વાઞ્ચાઽગ્ને તનુવં પિપ્રયસ્વાસ્મભ્યં ચ સૌભગમાયજસ્વ ॥
ગોભિર્જુષ્ટમયુજો નિષિક્તં તવેન્દ્ર વિષ્ણોરનુસઞ્ચરેમ । નાકસ્ય
પૃષ્ઠમભિ સંવસાનો વૈષ્ણવીં લોક ઇહ માદયન્તામ્ ॥
ૐ કાત્યાયનાય વિદ્મહે કન્યકુમારિ ધીમહિ । તન્નો દુર્ગિઃ પ્રચોદયાત્ ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ આયુષ્ય સૂક્તમ્ ॥

યો બ્રહ્મા બ્રહ્મણ ઉજ્જહાર પ્રાણૈઃ શિરઃ કૃત્તિવાસાઃ પિનાકી ।
ઈશાનો દેવઃ સ ન આયુર્દધાતુ તસ્મૈ જુહોમિ હવિષા ઘૃતેન ॥ ૧ ॥

વિભ્રાજમાનઃ સરિરસ્ય મધ્યા-દ્રોચમાનો ઘર્મરુચિર્ય આગાત્ ।
સ મૃત્યુપાશાનપનુદ્ય ઘોરાનિહાયુષેણો ઘૃતમત્તુ દેવઃ ॥ ૨ ॥

બ્રહ્મજ્યોતિ-ર્બ્રહ્મ-પત્નીષુ ગર્ભં યમાદધાત્ પુરુરૂપં જયન્તમ્ ।
સુવર્ણરમ્ભગ્રહ-મર્કમર્ચ્યં તમાયુષે વર્ધયામો ઘૃતેન ॥ ૩ ॥

શ્રિયં લક્ષ્મી-મૌબલા-મમ્બિકાં ગાં ષષ્ઠીં ચ યામિન્દ્રસેનેત્યુદાહુઃ ।
તાં વિદ્યાં બ્રહ્મયોનિગ્ં સરૂપામિહાયુષે તર્પયામો ઘૃતેન ॥ ૪ ॥

દાક્ષાયણ્યઃ સર્વયોન્યઃ સ યોન્યઃ સહસ્રશો વિશ્વરૂપા વિરૂપાઃ ।
સસૂનવઃ સપતયઃ સયૂથ્યા આયુષેણો ઘૃતમિદં જુષન્તામ્ ॥ ૫ ॥

દિવ્યા ગણા બહુરૂપાઃ પુરાણા આયુશ્છિદો નઃ પ્રમથ્નન્તુ વીરાન્ ।
તેભ્યો જુહોમિ બહુધા ઘૃતેન મા નઃ પ્રજાગ્ં રીરિષો મોત વીરાન્ ॥ ૬ ॥

એકઃ પુરસ્તાત્ ય ઇદં બભૂવ યતો બભૂવ ભુવનસ્ય ગોપાઃ ।
યમપ્યેતિ ભુવનગ્ં સામ્પરાયે સ નો હવિર્ઘૃત-મિહાયુષેત્તુ દેવઃ ॥ ૭ ॥

વસૂન્ રુદ્રા-નાદિત્યાન્ મરુતોઽથ સાધ્યાન્ ઋભૂન્ યક્ષાન્ ગન્ધર્વાગ્શ્ચ
પિતૄગ્શ્ચ વિશ્વાન્ ।
ભૃગૂન્ સર્પાગ્શ્ચાઙ્ગિરસોઽથ સર્વાન્ ઘૃતગ્ં હુત્વા સ્વાયુષ્યા મહયામ
શશ્વત્ ॥ ૮ ॥

વિષ્ણો ત્વં નો અન્તમશ્શર્મયચ્છ સહન્ત્ય । પ્રતેધારા મધુશ્ચુત
ઉત્સં દુહ્રતે અક્ષિતમ્ ॥

॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ ભાગ્ય સૂક્તમ્ ॥

ૐ પ્રાતરગ્નિં પ્રાતરિન્દ્રગ્ં હવામહે પ્રાતર્મિત્રા વરુણા પ્રાતરશ્વિના ।
પ્રાતર્ભગં પૂષણં બ્રહ્મણસ્પતિં પ્રાતઃ સોમમુત રુદ્રગ્ં હુવેમ ॥

૧ ॥ પ્રાતર્જિતં ભગમુગ્રગ્ં હુવેમ વયં પુત્ર-મદિતેર્યો વિધર્તા ।
આદ્ધ્રશ્ચિદ્યં મન્યમાનસ્તુરશ્ચિદ્રાજા ચિદ્યં ભગં ભક્ષીત્યાહ ॥ ૨ ॥

ભગ પ્રણેત-ર્ભગ સત્યરાધો ભગેમાં ધિયમુદવદદન્નઃ ।
ભગપ્રણો જનય ગોભિ-રશ્વૈર્ભગપ્રનૃભિ-ર્નૃવન્તસ્સ્યામ ॥

૩ ॥ ઉતેદાનીં ભગવન્તસ્સ્યામોત પ્રપિત્વ ઉત મધ્યે અહ્નામ્ । ઉતોદિતા
મઘવન્થ્સૂર્યસ્ય વયં દેવાનાગ્ં સુમતૌ સ્યામ ॥ ૪ ॥

ભગ એવ ભગવાગ્ં અસ્તુ દેવાસ્તેન વયં ભગવન્તસ્સ્યામ । તં ત્વા ભગ સર્વ
ઇજ્જોહવીમિ સનો ભગ પુર એતા ભવેહ ॥ ૫ ॥ સમધ્વરાયોષસોઽનમન્ત
દધિક્રાવેવ શુચયે પદાય । અર્વાચીનં વસુવિદં ભગન્નો
રથમિવાઽશ્વાવાજિન આવહન્તુ ॥ ૬ ॥

અશ્વાવતી-ર્ગોમતી-ર્ન ઉષાસો વીરવતીસ્સદ-મુચ્છન્તુ ભદ્રાઃ । ઘૃતં
દુહાના વિશ્વતઃ પ્રપીના યૂયં પાત સ્વસ્તિભિસ્સદા નઃ ॥ ૭ ॥ યો માઽગ્ને
ભાગિનગ્ં સન્તમથાભાગં ચિકીર્ષતિ । અભાગમગ્ને તં કુરુ મામગ્ને
ભાગિનં કુરુ ॥ ૮ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ મન્ત્રપુષ્પમ્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ્ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ
। સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાગ્ંસસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ । સ્વસ્તિ
નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૐ શાન્તિઃ શાન્તિઃ
શાન્તિઃ ।

ૐ યોઽપાં પુષ્પં વેદ । પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ । ચન્દ્રમા
વા અપાં પુષ્પમ્ । પુષ્પવાન્ પ્રજાવાન્ પશુમાન્ ભવતિ । ય એવં વેદ ।
યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ । અગ્નિર્વા અપામાયતનમ્ ।
આયતનવાન્ ભવતિ । યોઽગ્નેરાયતનં વેદ ॥ આયતનવાન્ ભવતિ । આપો

વા અગ્નેરાયતનમ્ । આયતનવાન્ ભવતિ । ય એવં વેદ । યોઽપામાયતનં
વેદ । આયતનવાન્ ભવતિ । વાયુર્વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યો વાયોરાયતનં વેદ । આયતનવાન્ ભવતિ ॥

આપો વૈ વાયોરાયતનમ્ । આયતનવાન્ ભવતિ । ય એવં વેદ । યોઽપામાયતનં
વેદ । આયતનવાન્ ભવતિ । અસૌ વૈ તપન્નપામાયતનમ્ । આયતનવાન્ ભવતિ
। યોઽમુષ્ય તપત આયતનં વેદ । આયતનવાન્ ભવતિ । આપો વા અમુષ્ય
તપત આયતનમ્ ॥ આયતનવાન્ ભવતિ । ય એવં વેદ । યોઽપામાયતનં
વેદ । આયતનવાન્ ભવતિ । ચન્દ્રમા વા અપામાયતનમ્ । આયતનવાન્ ભવતિ ।
યશ્ચન્દ્રમસ આયતનં વેદ । આયતનવાન્ ભવતિ । આપો વૈ ચન્દ્રમસ
આયતનમ્। આયતનવાન્ ભવતિ ॥

ય એવં વેદ । યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ । નક્ષત્રાણિ
વા અપામાયતનમ્ । આયતનવાન્ ભવતિ । યો નક્ષત્રાણામાયતનં વેદ ।
આયતનવાન્ ભવતિ । આપો વૈ નક્ષત્રાણામાયતનમ્ । આયતનવાન્ ભવતિ ।
ય એવં વેદ ॥ યોઽપામાયતનં વેદ । આયતનવાન્ ભવતિ । પર્જન્યો
વા અપામાયતનમ્ । આયતનવાન્ ભવતિ । યઃ પર્જન્યસ્યાયતનં વેદ ।
આયતનવાન્ ભવતિ । આપો વૈ પર્જન્યસ્યાઽઽયતનમ્ । આયતનવાન્ ભવતિ ।
ય એવં વેદ । યોઽપામાયતનં વેદ ॥

આયતનવાન્ ભવતિ । સંવત્સરો વા અપામાયતનમ્ । આયતનવાન્
ભવતિ । યસ્સંવત્સરસ્યાયતનં વેદ । આયતનવાન્ ભવતિ । આપો વૈ
સંવત્સરસ્યાયતનમ્ । આયતનવાન્ ભવતિ । ય એવં વેદ । યોઽપ્સુ નાવં
પ્રતિષ્ઠિતાં વેદ । પ્રત્યેવ તિષ્ઠતિ ॥

ૐ રાજાધિરાજાય પ્રસહ્યસાહિને । નમો વયં વૈશ્રવણાય કુર્મહે । સ
મે કામાન્કામકામાય મહ્યમ્ । કામેશ્વરો વૈશ્રવણો દદાતુ । કુબેરાય
વૈશ્રવણાય । મહારાજાય નમઃ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

# ॥ શાન્તિમન્ત્રાઃ ॥

॥ ૐ શ્રી ગુરુભ્યો નમઃ હરિઃ ૐ ॥

ૐ સહ નાવવતુ । સહ નૌ ભુનક્તુ । સહ વીર્યં કરવાવહૈ ।
તેજસ્વિનાવધીતમસ્તુ મા વિદ્વિષાવહૈ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥
ૐ યશ્છન્દસામૃષભો વિશ્વરૂપઃ । છન્દોભ્યોઽધ્યમૃતાથ્સમ્બભૂવ
। સ મેન્દ્રો મેધયા સ્પૃણોતુ । અમૃતસ્ય દેવધારણો ભૂયાસમ્ । શરીરં
મે વિચર્ષણમ્ । જિહ્વા મે મધુમત્તમા । કર્ણાભ્યાં ભૂરિવિશ્રુવમ્ ।
બ્રહ્મણઃ કોશોઽસિ મેધયા પિહિતઃ । શ્રુતં મે ગોપાય । ૐ શાન્તિઃ
શાન્તિઃ શાન્તિઃ ॥ ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ
પ્રતિષ્ઠિતમાવિરાવીર્મ એધિ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે મા
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્ સન્દધામ્યૃતં વદિષ્યામિ સત્યં વદિષ્યામિ
તન્મામવતુ તદ્વક્તારમવત્વવતુ મામવતુ વક્તારમવતુ વક્તારમ્ ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૐ આપ્યાયન્તુ મમાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ શ્રોત્રમથો
બલમિન્દ્રિયાણિ ચ સર્વાણિ । સર્વં બ્રહ્મૌપનિષદં માઽહં બ્રહ્મ નિરાકુર્યાં મા મા
બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં મેઽસ્તુ । તદાત્મનિ નિરતે ય ઉપનિષત્સુ
ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ ૐ ભદ્રં
કર્ણેભિઃ શ઼ૃણુયામ દેવાઃ । ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાગ્ંસસ્તનૂભિઃ । વ્યશેમ દેવહિતં યદાયુઃ
। સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥ ૐ શાન્તિઃ
શાન્તિઃ શાન્તિઃ ॥ ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે । પૂર્ણસ્ય
પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

Encoded and proofread by Rekha Venkatesh

*Vedamantramanjari 1*

pdf was typeset on August 31, 2020

Please send corrections to *sanskrit@cheerful.com*